National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 372-373
© 2026 NJHSR
www.sanskritarticle.com

**प्रो. के. अनन्ता**
आचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 16

**Correspondence:**
**प्रो. के. अनन्ता**
आचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 16

# दयायाः स्वरूपं महत्त्वञ्च

**प्रो. के. अनन्ता**

भगवतः कल्याणगुणसमूहेष्वतिशयेन श्रेष्ठायाः, लोके सर्वेषामकिञ्चनजनानां जननीभूतायाः, सर्वप्राणि-विषयकायाः दयायाः स्वरूपं महत्त्वञ्च क्रियायोगसारनामके पाञ्चसंहिताग्रन्थे प्राप्यते ।[1]

श्लोकार्थस्तु- हे भूमिसुरश्रेष्ठ! सर्वेषां दुःखं निवारयितुम्, यद्यपि महान् प्रयत्नः करणीयः स्यात्, तथापि यस्याः इच्छायाः हृदये उदयः भवति, सैव दयेति कथ्यते । इयं दयैव करुणेत्यादिशब्दैरपि स्तूयते । अतः परस्य दुःखस्य निवृत्तिं प्रति या इच्छा सा एव दया इति सर्वेषां दयालक्षणानां सामान्यरूपेण निष्पत्तिः भवति । एवं च व्यासेन "सर्वभूतहितैषित्वं दया" इत्युक्तेऽपि, परहितस्य कामना तेषां दुःखनिवारणस्य इच्छां विना न सम्भवति। अतः सर्वेषां जीवराशिनां हितेच्छा अन्ततः तेषां दुःखविनाशेच्छायामेव पर्यवस्यति । तस्मात् उभयत्रापि एक एव अर्थः स्वीकरणीयः। एवं दया नाम स्वप्रयोजनमनपेक्ष्य परस्य दुःखं सोढुमशक्तवती प्रवृत्तिरिति श्रीभाष्ये यदुक्तम्, तदपि वस्तुतः परदुःखविनाशेच्छायाः हेतुं निरूपयितुमेव प्रवर्तते। अतः पूर्वोक्तमतस्य श्रीभाष्यवचनस्य च परस्परं कश्चिदपि विरोधः नास्ति। अत्र प्रश्नः समुत्पद्यते यत् दया नाम किं परस्य दुःखेन स्वयमपि दुःखितभावः, उत वा परदुःखं दूरीकर्तुम् उत्पद्यमाना इच्छा? इति । समाधानन्तु, लोके स्वदुःखं न सहते इत्युक्ते यथा स्वदुःखस्यानिष्टत्वं विज्ञाय तत् निवारयितुमिच्छा इत्यर्थः प्रतीयते, तथैव परदुःखासहिष्णुता इत्यनेनापि परस्य दुःखं निवारयितुमिच्छा एव ग्राह्या भवति। मनुरपि, वर्तते सततं हृष्टः कृत्स्ना ह्येषा दया स्मृता, इत्यनेन परदुःखदर्शनात् जायमानं स्वकीयदुःखमेव दया न भवतीति प्रतिपाद्यते।

दयावान् सर्वभूतेषु इत्यादिषु प्रयोगेषु पूर्वोक्तार्थविरुद्धोऽर्थः न स्वीकरणीयः। दया भूतेषु इति गीतावचनस्य व्याख्याने भाष्यकाराः सर्वेषु प्राणिषु दुःखासहिष्णुतामेव दयारूपेण प्रतिपादयन्ति। गौतमसूत्रादिषु दया सर्वेषु भूतेषु इत्यादिवचनानामप्यमेवाभिप्रायः। अहिर्बुध्नियसंहितायां दया दुःखासहिष्णुत्वरूपेण निर्दिष्टा वर्तते। तथापि तत्रैव कृपायाः अनुग्रहस्वभावत्वं प्रतिपादितत्वात्, तस्यापि परदुःखनिवारणेच्छारूपत्वमेवान्ततः सिद्ध्यति ।

श्रुतप्रकाशिकाग्रन्थस्य सूक्ष्मतया निरीक्षणेनापि दयायाः वास्तविकं स्वरूपं परदुःखनिवारणेच्छैव इति निश्चीयते । तत्रान्येषां लक्षणानां विवेचनप्रसङ्गे उक्तं यत् चेतनस्यापि परमोद्देश्यस्य परमप्रयोजनत्वं स्वभावतः ज्ञातुं शक्यते। विशेषतोऽतिशयकृपाप्रेमसम्पन्नेषु पुरुषेषु तादृशस्य भावस्य दर्शनं भवति। दयायाः स्वरूपं हि स्वकीयप्रयोजनानपेक्षया परस्य दुःखं सोढुमशक्तत्वम्। यदि कश्चित् स्वकीयप्रयोजन-सिद्ध्यर्थं परस्य दुःखं निवारयितुमिच्छति, तर्हि तस्य परदुःखस्य निरन्तरता स्वस्यैव प्रयोजन-विरोधित्वेनानिष्टा भवेत्। अतः स्वार्थनिरपेक्षता इति पदेन तादृशः स्वार्थसम्बन्धः निरस्यते।

अत्र परदुःखम् इत्यादिना यः ग्रन्थभागः प्रवर्तते, तस्य परदुःखासहिष्णुतायाः समर्थनपरत्वात् स्पष्टमेव

ज्ञायते यत्, परदुःखमनिष्टमिति ज्ञात्वा तन्निवारणाय या इच्छा प्रवर्तते, सा एव परदुःखासहिष्णुता इत्यस्य शब्दस्य अभिप्रेतोऽर्थः। अतः परदुःखज्ञानजन्यस्वदुःखनिवृत्तिः दयालक्षणस्य अवयवः न भवतीति स्पष्टं ज्ञायते। यतः परदुःखदर्शनात् तत्क्षणं स्वस्य यत् दुःखं जायते, तस्य निवृत्तिः अत्र विवक्षितदयानां स्वरूपघटकः नास्ति। तदनन्तरं स्वजनस्नेहयुक्तः पुरुषः स्वस्य स्वार्थं न गणयित्वा पुत्रादीनां दुःखनिवारणाय प्रवर्तमानः दृश्यते। तस्य प्रवृत्तिस्तेषां दुःखासहिष्णुतया प्रेरिता भवति। अतः परदुःखस्यानिष्टत्वबुद्ध्या तन्निवारणायोत्पद्यमाना इच्छैवात्र दयारूपेणाभिप्रेता विद्यते । सहनं नाम अनिष्टत्वस्य अभावः। असहनं त्वनिष्टत्वमेव। व्याकरणशास्त्रे निर्दिष्टेन इष्णुच्प्रत्ययेन तादृशः भावः सूच्यते यः तत्कार्यस्य साधकः भवति। अतोऽनिष्टत्वसाधुकारिता नामानिष्टत्वस्य कार्यं जनयितृत्व-मेव। एवं परदुःखस्यानिष्टत्वबुद्ध्या तन्निवारणाय प्रवर्तमानेच्छैव परदुःखासहिष्णुतेत्यस्य यथार्थोऽर्थः। अतः भाष्यकारस्य अभिप्रायः प्रमाणसमर्थितेऽस्मिन्नेव अर्थे, न तु अन्यस्मिन्नर्थे वर्तते ।

भगवद्गुणवर्णनप्रसङ्गे रामायणवचनमपि दृश्यते। अनेन च परदुःखेन स्वयं दुःखितत्वं दयागुणस्य लक्षणमिति प्रतिभाति। यदि एवं चेत्, कथं परदुःखनिवारणेच्छैव दया इति पूर्वोक्तं लक्षणं समर्थ्यते?[2] अत्रोत्तरन्तु भगवान् अनुकूलजनानां मनः प्रसादयितुं, प्रतिकूलजनानां च निग्रहं कर्तुं, तत्तत्स्थितिम् आश्रित्य विविधभावान् प्रदर्शयति। अतस्तस्य करुणाभिनयोऽपि भगवतः प्रयोजनविशेषेण समन्वित एव भवति।

**ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः।**
**कर्मण्यारभते कर्तुं कीनाश इव दुर्लभः॥**[3]

इत्यादिवचनैः भगवतः मायायोगेन लोकानां वञ्चनमपि तस्य लीलाविशेषरूपमेव इति ज्ञायते।

भगवद्गुणदर्पणस्थवचनेऽप्ययमेव भावः। अधिकारी जीवः स्वस्य सुखदुःखयोः यथा अनुभवकर्ता भवति, तथा तदपेक्षयाधिकतरेण भगवानपि तादृशभावम् अभिमन्यते ।

लोकेऽपि यत् वस्तु स्वस्यानुकूलरूपेण प्रतिभाति, तदन्यस्य प्रतिकूलरूपेण प्रतिभासितुं शक्नोति । एवं परदुःखस्यानिष्टत्वं ज्ञात्वा तन्निवारणाय प्रयत्नं कुर्वन् पुरुषः परदुःखासहिष्णुरिति कथ्यते। तथैव परदुःखस्य दुःखरूपत्वं ज्ञात्वा तस्यानिष्टत्वबुद्ध्या यः तद्विषये दुःखितत्वेन व्यवह्रियते, सः परदुःखदुःखीति लोके कथ्यते। किन्तु तेन परस्य दुःखं वास्तवतः स्वस्य दुःखरूपेणानुभूतमेव भवतीति आवश्यकं नास्ति।

दया पुनः द्विविधा, सहेतुका च निर्हेतुका च। भगवतः सृष्टिसङ्कल्पः निर्हेतुककृपया एव प्रवर्तते। किन्तु विषमसृष्टिः जीविनां पूर्वकर्माधीनत्वात् सहेतुककृपारूपा इति विवेकः। एवं श्रीभाष्य-कारस्य दया नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता इति मतमनुसृत्य श्रीवेदान्तदेशिकेनापि दयायाः स्वरूपं तदेव प्रतिपादितम्। अतः स्वाभाविकतया विचार्यमाणे दया नाम सर्वेषां भूतानां हितस्य इच्छा, अर्थात् सर्वप्राणिनां दुःखनिवारणाय प्रवर्तमाना निरपेक्षा इच्छा, इति सिद्ध्यति। तस्मात् "परदुःखापाचिकीर्षा दया" इत्येव दयायाः तात्त्विकं स्वरूपम् इति निश्चितरूपेण प्रतिपादयितुं शक्यते।

दयायाः विषयमधिकृत्य न केवलं सामान्यग्रन्थेषु प्राप्यते, अपि तु प्रौढशास्त्रग्रन्थेष्वपि यथा अधिकरणसारावल्यां, श्रुतप्रकाशिकादिषु च विशदं प्राप्यते । लेखेऽत्र मयाधीतानां दयाविषयपराणां लक्षणादीनां स्वरूपविश्लेषणं यथा मति विहितं विद्यते ।

**सहायकग्रन्थाः**


- श्रीमद्रामायणम्, महर्षिवाल्मीकिः, इन्डोलोजिकल् बुक हाउस्, वाराणसी, 1983
- पद्मपुराणम्, वेदव्यासः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2016
- श्रीभाष्यम् श्रुतप्रकाशिकासहितम्, विशिष्टाद्वैतप्रचारिणी सभा, मद्रास, 1989
- तत्त्वमुक्ताकलापः,वेदान्तदेशिकः,आर्षग्रन्थप्रकाशनम्, मैसूर्, 2004
- अधिकरणसारावलिः, वेदान्तदेशिकः, वीपीटीवी कैङ्कर्य ट्रस्ट्, काञ्चीपुरम् 2016


**पाद टिप्पणी**

[1] यत्नादपि परक्लेशं हर्तुं या हृदि जायते।
इच्छा भूमिसुरश्रेष्ठ सा दया परिकीर्तिता॥- पद्मपुराणम्

[2] व्यसनेषु मनुष्याणां भृशं भवति दुःखितः।
उत्सवेषु च सर्वेषु पितेव परितुष्यति॥
श्रीमद्रामायणम्, अयोध्याकाण्डः, 2 सर्गः, 40-41 श्लोकौ

[3] महाभारतम्, उद्योगपर्व, 66 अध्यायः, 14तमः श्लोकः